मुत्पतनमार्गं हित्वा दूरगामिनं भवंतं लंघयेयुः ॥ त्यक्तमार्गत्वात्तं पि शरभाणां लंघनं न संपत्स्यते ॥ किंतु तेषां दू त्व ६
रभाग भावीति भावः ॥ भोजलद ॥ तान्समरभान्तुमलो रौद्रश्रीसारकानां वर्षपिलनामासमंतत् ॥ दृष्टिपातैः स
नावकीर्णान्कुर्वस्त्विषा कुर्वीथाः ॥ उक्तमनेनार्थीतरन्यासेन प्रहरति ॥ निःफलाफलारहिताः स्वारंभयत्नाः
कर्मव्यापारायेषां ते के वा प्राणिनः परिभवस्यन्यक्कारस्य दमास्थानं नास्फुः ॥ नुक्कापि दृष्टिहासावकीर्णत्तिनितिपा राम
ठः ॥ तत्र दृष्टिरेव हसो हास्यां तेनावकीर्णान्तु ॥ वर्षोपरक्तकरकः शरभः कुंजराराति रुत्पादकोष्टपादपात्य २०
दि

ता

भि मनिर्विमुणी ॥५६॥ अन्यदपि मंगलमुपदिशति ॥ तत्रेति ॥ भौमे घृत त्वहि भवति ॥ दृषदि शिलायां व्यक्तं स्पष्टं त्व
द्वेदुमौली मर्महेशस्य चारणन्यासं भक्त्यानम्रः ॥ सन्नूपरीयाः परितेईयादृति भावाः ॥ कीदृश्यां शश्वदनवरतं सिद्ध
सद्योरूपहृतो वलिः कृतोपहारो यस्य तां ॥ भावनोत्पादनापातं त्रकयमि ॥ यस्मिन्नूचरणन्यासे दृष्टे सति उद्धूतपाप
गतकल्मषाः ॥ अदृक्षमनाः अद्वावेताः प्राणिनः करणस्य विगमात्त्यागात् ॥ उर्द्धं स्थिरवर्ततंत्रगणनोपदं स्थानं त्वतस्य
प्राप्नयेकाल्यिष्यं तेस पत्स्यंते ॥ अर्थ शब्दस्यार्थग्रहणात्पर्याभिधायिनः ॥ रूपेर्यागवचतुर्थी वलिः पूजोपहेस्वदत्य मंदेक
छ घ रेपिद्वेतियादवः ॥ करणं साधकतमं क्षेत्रगात्रेंद्रियेष्वित्यमरः ॥ अर्द्धश्वासाविंदुश्चेति विशेषण समासः ॥ ननु इंदोरर्द्ध
मर्द्धेंदुरिति ॥ अर्द्धं नपुंसकमिति ॥ नपुंसका द्विशब्दस्यैव सामासामिध्यनात् ॥ समभिप्रविभागवाचिन एव नपुंस
कत्वात् ॥ शंभुशिरसि कलामात्रस्यैवावस्थानात् ॥५७॥ तत्राहितांतरमुपदिशति ॥ शरदा यत इति ॥ तत्र हि भव
ति अनिलैर्वातैः पूर्यमाणैः कीचकैः सच्छिद्रवंशा मधुरं यथास्यात्तथा शब्दायंते शब्दं विधत्ते सरक्ताभिर्भक्ति
युक्ताभिः किन्नरीभिः त्रिपुरविजयस्त्रिपुरदाहारवः प्रबंधो गीयते ॥ उमे पञ्जलटूप्रयोगः सदा संभवात्तु तः
भयन

हमेवृत्ते ध्वनिर्मुरजइव कंदरेषु गुहासु निर्ह्रादी नादवान् भवेच्चेत्तर्हि पशुपतेर्महेशस्य संगीतार्थः ॥ समग्रः संपूर्णो भावी भ
विष्यति ॥ ननु निश्चितं ॥ निर्ह्रादो निनादो नादः ॥ गीतवाद्यत्रयं नाट्यं ॥ तौर्यत्रिकं च तत् ॥ संगीतं प्रेक्षणीयार्थे स्मिन्नित्य
भिधानचिंतामणिः ॥ चरणन्यासमंतरेण शंभुर्वसतीति प्रसिद्धः ॥ ५८ ॥ उदीच्यां प्रति वेगगमनोपायं दर्शयन्नाह ॥ प३
२१ प्रालेयाद्रेरिति ॥ भो मेघ प्रालेयाद्रेर्हिमाचलस्योपतटं तटस्य पार्श्वे तांस्तान्विशेषान् पूर्वोक्तानतिक्रम्यो
ल्लंघ्य हंसानां मानसाख्यं सरोगमनद्वारं भृगुपतेः परशुरामस्य यशसः वर्त्म प्रसृति मार्गभूतं यत्क्रौंचस्य पर्व
तस्य रंध्रं छिद्रमस्ति तेन रंध्रेणोदीच्यां दिशं त्वमनुसरेरुद्दिश्य गच्छेः ॥ कीदृशस्त्वं तिर्यक्कृति रुच्छ्रीनोपचेयामो दि
स ४ स्तारस्तेन शोभत इति शोभीत्वं नृवियन्मंडलं ॥ ब्रजन् बलिनाम्नो राज्ञस्तस्य नियमनं नियंत्रणं तत्राभ्युद्यत
स्य सोद्यमस्य विष्णोस्त्रिविक्रमस्य श्यामः पाद इवास्थितः सन् क्रौंचवनं वीरिकार्त्तिकेयेन स्पर्द्धमानः परशुरामः क्रौं बारेणा३
चपर्वतं सच्छिद्रमकार्षीत् ॥ तेन तस्य महती कीर्तिरासीदिति कथा ॥ ५९ ॥ अतः परं मार्गमुपदिशति ॥ गत्वेति ॥ राम
भो मेघ त्वं तेन रंध्रेणोर्ध्वं गत्वा कैलासस्यातिथिः स्याः ॥ न वेत्सं गच्छेरित्यर्थः कीदृशस्य ॥ दशमुखस्य रावणस्य भुजे २१

स्थ१ तिः त्रिदश०

तल्लोभितो विधुरित्युक्तः प्रस्थानो संधिर्यस्य ॥ रूपमयत्वात् ॥ तथा त्रिविधवनितानां दर्पणता स्तस्य ॥ ननु त्रिदशवनितादर्
पणस्यैतत्कथं ॥ मेघवायोस्पर्शेन ॥ मालिन्यप्रसंगात्कथं संभवेदित्याशंक्याह ॥ कैलाशस्य महत्त्वया मालिन्यं न भ
वतीति महां दर्शयति यः कैलाशः कुमुदवद्विशदैर्निर्मलैः शृंगोच्छ्रायैः खमाकाशं वितत्य विस्तीर्य प्रतिदिशं दिशि दि
शि राशीभूतः त्र्यंबकस्य शंभोरट्टहास उद्दहासइव स्थितः ॥ नकारो गत्यानां तत्रैयैर्मुख्यार्थः ॥ दशमुखेत्यादि ॥ वि म४
शेषणमुक्तमिति न वाच्यं ॥ अभिगम्यस्य शैलस्याभिभषावित्वादिति वाच्यं अन्यानु इत्ये तत्पतः प्रक्षेप्तुं शक्नो
तिः तेनाप्यस्य साफत्यमस्खोच्छ्वा समात्रमेव कृतमिति ॥ उत्कर्षस्याविवक्षितत्वात् ॥ ६० ॥ उत्पश्यामीति ॥ भो मेघ
॥ त्वयि तटगते प्राप्ते सति तस्याद्रेः कैलाशस्यातिरमणीयत्वात् ॥ स्तिमितैर्निश्चलैर्नयनैः प्रेक्षितुं योग्यां भवित्रीं भ
विष्यतीति ॥ शोभामुत्पश्यामि ॥ उत्प्रेक्षते ॥ कस्मिन्सति कस्येव स्थेवमेव के नीलेवाससि अंशन्यस्ते सति हलंशारं
विभर्त्तीति हलभृत्तो वलभद्रस्येव ॥ कीदृशे त्वयि स्निग्धं च ततुभिन्नं विदारितं तदंजनं तद्वद्दा भाति कीदृशस्य कै
लाशस्य कृत्त्वाच्छिन्नश्चासौ द्विरदस्य दंतस्य छेदस्त्वद्वत्तगौरस्य कृष्णेनीलासितश्यामकालः श्याममत्तेचकेच्य

हित्वा१

मरः ॥६१॥ तत्रहितमुपदिशति ॥ तस्मिन्निति ॥ हे पयोद ॥ तस्मिन् क्रीडाशैले कैलाशे भुजगवलयं सर्प्पभूषणां हित्वा
त्यक्त्वा शंभुना दत्तहस्ता सती गौरीति पादचारेण यदि विहरेत् ॥ तदा भंगा विभंगाः शंकलानि भक्त्यः संति भंगीभक्त्या विरचि
तं पिच्छिद्य रचितं वपुर्यस्य स तथा स्तंभितो गीतस्य जलस्योघः प्रवाहो जेनात् तादृशः सन् ॥ आरोहणाय सोपानत्वं नि
श्रेणित्वं कुरु ॥ कीदृशं सुखयंतीति सुखः पदाघात ॥ तादृशयोः स्पर्शो यत्र तत् ॥६२॥ हितांतरमुपदिशति ॥ तत्रेति ॥
भो वारिद ॥ तत्र पर्वते सुरयुवतयो देवांगनास्त्वं भवंतं यंत्राणि शालभंजिकाप्रभृतीनि तत्करतलप्रवृत्तनीराधाराप्रवु
रगृहं यंत्रधारागृहं तस्य भावस्तत्त्वं अवश्यं निश्चितं नेष्यंति कीदृशं वलयकुलिशांते न यत् ॥ घट्टनं तेनोद्गी
र्ण४ र्णं तोयं येन स तं ॥ भो सखे घर्मेण लब्धस्य तव ताभ्यो युवतिभ्यो मोक्षो यदि न स्यात् ॥ तर्हि क्रीडायां लोलाः सतृष्णाः स्त्रायु
वतीः श्रवणपरुषैः कर्णकटुकैः गर्जितैर्भापयेस्त्रासयेः ॥ गर्ज्जितभीतेस्त्वां त्यक्ष्यंतीति भावः ॥ ननु घर्मलब्धस्येत्य
संगतं ॥ वर्षर्तुसमयत्वादिति न वक्तव्यं ॥ कैलाशस्य सुरभूमित्वेषु णामपि ऋतूनां संभवात् ॥ यद्वा घर्मशब्देन श्रमो राम
विवक्षितः क्लमलब्धस्येत्यर्थः ॥ क्लमस्येत्यर्थः ॥ हेतुरूप ॥ मेघात् स्त्रीणां न भयं किंतु गर्ज्जितात् ॥ अतो हेतुभये २२

क्लृ४

बुगितिनडा॥ ६३॥ हेमांभोजेति॥ भोमेघ॥ तंनगेंद्रंकैलासंनिर्विशअनुभवेः॥ कीदृशः हेमजानांमंभोजानांप्रस
वोसवोजन॥ नमस्यमानसस्यमानससरोविशेषस्यसलिलमाददानः॥ कामंपर्यथेच्छं॥ ऐरावतस्यगजस्यलेक्ष
णंमुहूर्त्तंमुखपटप्रीतिंमुखावगुंठनवस्त्रलाभप्रीतिंकुर्वन्॥ सजलपृषतैः॥ जलकणिकासहितैः॥ वातैःकल्पवृ
क्षकिशलयप्रभृतानिअंशुकानिवस्त्राणि॥ धुन्वन्कंपयन्पुनःकीदृशःस्वच्छायायाप्रतिबिंबेनभिन्नः॥ संगीतःस
न्कीदृशंनगेंद्रंस्फटिकविशदंनिर्मलं॥ यथाकोपिसखीमित्रालयंगत्वातत्संबंधिनीदीर्घिकावाहतारामप्र
भृतीनियथाकामंनिर्विशतितद्वदितिध्वनिः॥ प्रसवोजननानुज्ञाप्रवेषुफल पुष्पयोरितियादवः॥ ६५॥ उत्तरो
त्कीर्तनेनालकांबोधयितुमाह॥ तस्येति॥ भोकामचारिन् जलदप्रणयिनोभर्तुरिवतस्यकैलासस्योत्संगेउ
परितटेत्वंपुनःअलकांदृष्ट्वानज्ञास्यसइतिनापितुज्ञास्यसे॥ द्वौनत्रौप्रकृतिमर्थंगमयतः कीदृशीं
स्रस्तंभ्रष्टंगंगैवदुकूलंविशदवस्त्रंयस्यास्तांदर्शनमेवविशदयति॥ यालकावस्त्रदिशानामेघानांकाले
समयेवर्षासुवित्पथैः उच्चैरुन्नतैर्विमानैः सप्तभूमिकप्रासादैः सलिलमुद्गिरति सलिलोद्गारः॥ कम्मि

रायणीतं ॥ अभ्राणां वृंदं मेघानां समूहं वहति ॥ मुक्ताजालेन मौक्तिकगणेन ग्रथितं नद्धं अलकं भालावलंबि केश
२३ विन्यासविशेषं कामिनी वनिता विमानोस्त्री देवजने स[illegible]नो मेव मे सप्तानि ॥ जालं गवाक्षः आग्रनाये क्षारकेकगणाः इति
वयर्दवः ॥ दुकूलं सुक्ष्माक्षवस्त्रे पीति केशवः ॥ ६५ ॥ इदानीं यावत्पूर्वमधसंदेशः संपूर्णः ॥ सांप्रतमलकादर्शने कौतुकमुत्पा
दयन्नलकाज्ञानार्थमेनामेव वर्णयति ॥ विद्युत्वंतमिति ॥ भो मेघ ॥ यत्रालकायां प्रासादहर्म्याणि तैस्तैर्विशेषैस्त्वां
भवंतं तुलयितुं सदृशीकर्तुं अलं पर्याप्ताः ॥ विशेषणद्वारेणतानेव विशेषानाह ॥ कीदृशं त्वां विद्युत्वंतं विद्युतेयस्य तं
॥ ललितामनोरमा वनिता येषु तानि इति साम्यं ॥ इंद्रचापेन सह वर्त्तते इति सेंद्रचापं चित्रेणालेख्येन सह वर्त्तते इति
साम्यं ॥ स्निग्धो मधुरो गंभीरो धीरो घोषो गर्जितं यस्य तं ॥ तथा संगीतस्य नृत्यगीतवाद्यादित्रयस्यार्थाय हेतवः प्रहताश्च
मुरजा येषु त इति साम्यं ॥ अंतर्गतं तोयं जलं यस्य तं मणिमय्यो भुवो येषां त इति साम्यं ॥ तुंगमुन्नतं अभ्रमाकाशं या ३
लिहंति स्पृशंति अग्राणि येषां त इति साम्यं ॥ अत्र सुराभ्रेड्डुमरुत्पथौ व्यरमित्यभिधानचिंतामणिः ॥ अभ्रंलि राम
हं इति वहाभ्रौ लिह इति खश्प्रत्ययः तुलयासादृश्ये नग्रहणातीत्यर्थः ॥ तुलाप्रातिपदिकात्णिजं तां तुलयितुं २३

श्रीः

रूपं तु॥ लउ उन्मादे नेरूर्म्मुरादिकात्तोलयितुमिति स्मात्॥ आसेरव्याश्चर्ययोश्चित्र अलंभूषणपर्याप्तशक्तिवारणवारण
वाचकमित्यमरः॥ ६६॥ तस्याः परिज्ञानाय चिह्नांतरमाह॥ हस्ते ति॥ यत्रैलकायां वधूनां सीमंतिनीनां हस्ते लीलाक
मलं॥ अन्यत्र जातावेकवचनं॥ एतेन विद्यानां त्रयस्यनैकद्यं दर्शितं॥ अलके कुटिलकेशविन्यासे॥ इहापि जात्यारव्या
यामेकवचनं॥ बालानां नूतनानां कुंदानां कुंदकुसुमानां अनुबंधः॥ संबंधो येन तेन नहेमंतस्य सं[?]निधिः॥ तथा ननश्री मुखल
क्ष्मीर्लोध्रस्य वृक्षविशेषस्य प्रसवैः पुष्पैः तस्य रजसा परागेण पांडुतां गौरत्वं नीता प्रापिता॥ एतेन शिशिरांश्यशः॥ चू
डापाशे केशकलापेन वं कुरवकं॥ अनेन वसंतः॥ कर्णे चारु रम्यं शिरीषं सपुष्पमेते नतपर्तीः सान्निध्यं सीमंते केश
वीथ्यां नीपं कदंबपुष्पं॥ कीदृशं त्वदुपगमजं तवोपगमात्प्रादुर्भूतं॥ अनेन वर्षागमस्य सामीप्यं॥ अत्र सुवर्णा
भरणसंभवाभरणसंभारपरिहारेण पुष्पादिभरणकथनेन च॥ तत्रत्यानां नितंबिनीनां सुकुमारत्वं ना
गरत्वं वा सूचि॥ वधूर्जाया स्नुषा स्त्री चेत्यमरः॥ अलकं वालकुंदानुविद्धमित्यसदृशः पाठः॥ अलकास्वर्णकुं

त्न्नाद्इतिपुंस्त्वनिर्देशात्॥ प्रक्रमभंगदोषपोषप्रसंगाच्च॥ यद्यपिकुंदपुष्पंशिशिरविहितंतथापिहेमंतस्यापिहेमंते
उत्पन्नैः शिशिरेप्रौढाभावादृतोबालइतिप्रयोगः॥ सर्वज्ञातावेकवचनं॥६७॥ आनंदोत्थमिति॥ यत्रपुरिवित्तेशानां
यक्षाणांनिह्वाणांनयनसलिलंनेत्रजलंआनंदोत्थंहर्षोत्पन्नं॥ अन्यैर्निमित्तैःशोकसंतापादिभिर्न्नाइष्टसंयोगेनसाध्यान्नि
२४ वारणीयात्॥ कुशुमशरः॥ कामस्तज्जानात्तापादन्यस्तापोन॥ प्रणयकलहदन्यत्रप्रयोगस्यावियोगस्योपपत्तिःसद्भावो
नातथ्ययौवनादन्यद्वयस्थभरवल्वस्ति॥६८॥ स्वपोपिवर्णनेनतमुत्साहयति॥ यस्यामिति॥ यस्यमलकायामुत्तमाःस्त्रियः
सहायायेषांतेतादृशाःसंतोयक्षाहर्म्यस्थलानिएत्यप्रथापुष्परेषु॥ वाद्यभांडमुखेषुशनकैराहतेषु॥ सत्सुरतिःफ
लंयस्यतत्॥ कल्पवृक्षात्प्रसूतंजातमधुसधमासेवने॥ आस्वादयंति॥ कीदृशिहर्म्यस्थलानिसितमणिमयानिस्फ
टिकमणिरचितानिअतएवज्योतिषांनक्षत्राणांछायाःप्रतिबिंबान्येवकुसुमवरननि कीदृशेषुपुष्करेषु राम
॥ तवेवभीरोध्वनिनिर्येषांतेपुष्करंकरिग्रस्ताग्रेवाद्यभांडमुखेजले॥ व्योम्निखड्गकफलेफल्गेतीर्थेब्धिविशेषयोरि

२४

त्यमरं ॥ ६ ॥ भूयोपितांवर्त्तायतिमंदाकिन्या इति ॥ यत्रालकायां कन्या अन्वेष्टव्यैर्गीर्वेषणीयैः कनकमयीषु सिक
तासु वालुकासु मुष्टिक्षेपेण गूढैः गुप्तैर्मणिभिः कृत्वा संक्रीडंते दीव्यंति ॥ कीदृश्यः ॥ अमरैः प्रार्थिताया निताः तथा
मंदाकिन्याः सलिलेन शिशिरैः शीतलैर्मरुद्भिः पवनैः सेव्यमानाः तटे अनु अनुतटे रोहंतीति रुहः तेषां मंदारा
णां कल्पतरूणां छायया वारितोष्णाः ॥ संक्रीडंति ॥ क्रीडानुसंपरिभ्यश्चेति तङ् ॥ ७० ॥ लिंगांतरेणापुनरपि तां ज्ञापय
ति ॥ नीवीति ॥ यत्रालकायां कामादनिभृताः व्याप्रियमाणा येषु प्रियेषु च बिंबाधरेषु नीवीबंधपरिधानवासोपि न्यासवि
शेषस्तस्यो छूसितेन विकासेन शिथिलं वासो वस्त्रमाक्षिपत्सु सत्सु ह्रीमूढानां लज्जामुग्धानां यक्षांगनानां चूर्णमु
ष्टिर्मुरवां वासकर्पूरादिर्विफलप्रेरणा भवतीति किं कृत्वा ॥ अर्चिस्तुंगान दीप्तिरुचा न्ररत्नान्येव दीपास्तानभिमुखं
[illegible] प्राप्य कोर्थः ॥ मुग्धा यक्षांगनाः सुरतक्षणोदीशमनाय चूर्णमुष्टिप्रक्षिपंति ॥ रत्नदीपानां शाभावाद्विफला भ
वंतीति भावः ॥ ७१ ॥ नेत्रेति ॥ भोमेघ ॥ यत्र तमिव दृश्यते त्वादृशाजलस्य लवं कणिकां मुंचंतीति जललवमुचो
नेत्राप्रायकेन सततगतिना मरुता विमानाः सप्तभूमिकाः प्रासादीस्तेषामग्रभूमीः नीताः प्रापिताः संतः ॥ अ

लेख्यानां तत्रत्यचित्राणां सलिलसकणिकालवास्तामि दोषंनाशरूपमुत्पाद्य शंकास्पृष्ट इव चित्राभिनाशं विलोक्य स्मा
न्गृहीष्यतीति शंकमानाः धूमस्योद्गारो निर्गमस्तस्यानुकृतिषु अनुसारेणो निपुणाः समर्था जर्जरीशः संतो यत्र जाले
२५ र्मुरजवंध्यदिजाले निर्ष्यंततिनिर्गच्छंति ॥ ७२ ॥ भूयोपि विशिष्टां तरेणाज्ञापयति ॥ यत्रेति ॥ यत्रालकायां तंतुमयं जालं
तंतुजालमानायस्तत्र जालंबंते ॥ प्रासादानामुपरितनेषु भागेषु बंद्धांतमणिबंधरवनास्तंतुजालस्थिता इति
भावः ॥ तवरोधस्यापगमे सति विशदैश्चंद्रस्य पादैर्मयूखैर्निशीथे रजन्यां स्फुटान् जलवान् स्यंदिनश्चंद्रकांताः प्रियतम
भुजोच्छासितानां प्रियतमस्य भुजदृढालिंगितानामित्यर्थः ॥ स्त्रीणां सुरतजनितामंगग्लानिं व्यालुपंति नाशयंति ॥ जालं स
मूह आनायगवक्षक्षारकेष्वपीत्यमरः ॥ यंत्रजालेति पाठे यंत्राणि पुत्रिकाप्रभृतीनि तद्युक्तेषु लंबमाना इति ॥ ७३ ॥
॥ पुनरप्येनां वर्णयति ॥ गतीति ॥ यत्रालकायां सवितुरपि न्यस्योदये एभिः ॥ कामिनानां स्त्रीणां नैशो निशासं
बंधी मार्गः सूच्यते ज्ञाप्यत इत्यर्थः ॥ एभिः कैरित्याह ॥ गतेर्गमनात् उत्कंपस्तस्मात् अलकेभ्यः पतितैर्मंदारपुष्पैः सु राम
रतकुसुमैस्तथा कुड्मलवितः छेदा येषां तैः कनकमलैर्हैमपद्मैः कीदृशैः कर्णेभ्यो विभ्रंसितभिस्तैः ॥ हहारै २५

स्वाकिंकिणिशिष्टैः ॥ मुक्तासु मौक्तिकेषु लग्नः स्तनानां कुचानां परिमलः सौगंध्यं येन्यस्ते तैः ॥ छिन्नानि त्रुटितानि सू
त्राणि तंतवो येषां तैः ॥ ॥ ७४ ॥ मत्वेति ॥ यत्र पुर्यां धनपतेर्धनदस्य सखायं तं महेशं साक्षात्प्रत्यक्षं वसंतं तिष्ठंतं मत्वा प्राय
उत्प्रेक्षायामव्ययं भयात् त्र्यंबकनेत्रवह्निभीतेः षट्पदा भ्रमरा एव ज्या यस्य तं चापं न वहति न दधाति ॥ मपि वपुर्देशं
प्राप्ते स्मरपीडा कथं भविष्यतीत्याशंक्याह ॥ तस्य स्मरस्यारंभः प्रवृत्तिः सभ्रूभंगं तत् कुटिलं यथा स्यात्तथा प्रहितनयनैः प्रेषि
तनेत्रैः कामिनेपवलक्ष्याणि शरव्याणि तेषु अमोघैः सफलैः चतुराणां वनितानां विभ्रमैर्विलासैरेव सिद्धो निष्पन्नो
भवेत् ॥ मन्येशंके ध्रुवं प्रायो नूनमित्येवमादिभिः ॥ उत्प्रेक्षा व्यज्यंते शब्दैरिवशब्दोपि तादृशः इति दंड्यलंकारे ॥ ७५ ॥
तत्र स्वालयं ज्ञापयन्नाह ॥ त त्रे ति ॥ तत्र पुरि धनपतेः कुवेरस्य गृहात् उत्तरेणोत्तरतः समीपेऽस्मदीयं आगारं गृहं ॥
॥ कीदृशं सुरपतिधनुरिंद्रचापं वच्चारुणा मनोज्ञेन तोरणेन दूरात् लक्ष्यं पस्य गृहस्योपाने कृतकस्त्वा ॥ सोतु नय
श्च मे मम कांतया वल्लभया वर्द्धितः ॥ उदकसेकादिना वृद्धिं प्रापितो हस्तेन प्राप्याः शक्याः स्तवकाः गुच्छाः स्तैर्नमि
तो बालमंदारवृक्षोस्ति ॥ उत्तरेणेति एनवन्यतरस्यामदूरेपंचम्या इत्येनशब्दे अत्ययंचम्या इत्येनपू ॥ अव्ययं

२६

ए ॥ नपाद्धितीयेतिद्वितीद्वितीया ॥ ७६ ॥ ॥ विष्कांतरेणाग्रहं ज्ञापयति ॥ वापीति ॥ ॥ अस्मिन्वापी दीर्घिकावा
स्ति ॥ कीदृशी ॥ मरकतन्मेवशिलास्ताभिर्बद्धः सोपानानां मार्गो यस्या हेम्नइमानि तैर्विकचकमलैर्विकसितपंक
जैर्स्फुरन्नाव्याप्ता ॥ कीदृशैः स्निग्धानिष्कतिमंतवैडूर्याणि विडूररत्नमयानि नालानि येषां तैः ॥ नके चलंवालमंदा
रवृक्षावापी चेति चकारार्थः ॥ यस्या वाप्यास्तोये कृतवसतयो हंसा व्यपगतासु कृशोकोयेषां ते लाभवंतपेक्षापि
सन्निकृष्टं समीपं मानसरः ॥ नध्यास्यंति न स्तारिष्यंति ॥ तोयग्रहणां प्रावृट्कालेपि नीरस्यप्रासादातिशेषसूचना
र्थं ॥ ७७ ॥ वापीमेवनिरूपयंनाह ॥ तस्या इति ॥ तस्या वाप्यास्तीरे तटे क्रीडाशैलाः पर्वतोस्ति ॥ कीदृशः पेशलैरमै
रिंद्रनीलैर्विहितानि शिखराणि यस्या सतथ्य ॥ कनककदलीनां वेष्टनपृश्यप्रेक्षणीयः ॥ हे सखे मित्र महहिन्याः
प्रियायाः प्रियइति ॥ उपांतेनिकटे स्फुरितातडित्दिघ्नस्यतलामेवप्रेक्षाकातरेणचेतस ॥ तत्क्रीडामे शैलमेवस्मरामि
मिद्रन्याः प्रियइतितेकारणां संस्कारोद्वोधहेतुः सदृशाष्टविताद्याइत्कःकृलादिंद्रनीलाशिखरेणाकदलिवे राम
ष्टितेनपर्वतेनविद्युल्लताकृष्णमेघसदृशः ॥ ७८ ॥ रक्तेति ॥ तत्रगृहे चलानिकिशालयानिपल्लवायस्य सतथा २६

॥ ॥रक्ताश्वासावशोकश्चकांतः केशरो वकुलस्थ्वरवकीदृग्द्विविशेषाम्याद्वृत्तिरावरावाररायस्य माधव्यावासंतलामं
उपस्यप्रत्यासंतोसपवर्त्रिं नैतितिष्ठतः ॥तयोर्मध्येएको दोहदमेवच्छमव्याजस्तेनमहायासहवदनमदिरांसुरवमद्य
माकद्दति ॥यथाहंस्तेनहे वनास्वमाकांक्षामितथा यमपीत्यर्थः ॥स्त्रीचरणाप्रहारेणाशोकस्य योषमुषुसुधावि
तरणीनकेशरस्यवकुलकुसुमाद्युत्पातिः ॥ ७८ ॥भूयोपिनिजालयंचिह्नांतरेज्ञापयति ॥ तन्मध्य इति ॥॥तन्मध्ये
गृहमध्येकववनस्यविकारः कांचनीववासयषष्टीनिवासदंडोस्तिचकारउक्तसमुच्चये ॥कीदृशीस्फटिकमयाफलकं
यस्याः सा ॥तथानतिप्रौढानवावशस्तद्वत्वकाशंते ॥ तैर्म्मणिभिर्म्मरकतैर्मूलेवह ॥ भोमेघ ॥दिवरविगमेनदिनावसा
नेयांवासयष्टि ॥ वोयुष्माकंसुहन्मित्रंनीलकंठोमयूरोध्यास्ते कीदृशः ॥ मेकांतेजांस्त्रिया संजिता तत् युक्तानिवलू
यानितैसुभगैः रम्यैतालैकरतलस्फालनतालनेवाद्यैःकृ वानर्तितः ॥ अध्यास्त इति अध्यशीङ्स्थासाकर्म
॥सिजहल्लयसुभगैरित्यस्फुटः ॥पाठः सिंजिव्यक्ते शब्दे ॥ इत्यस्यात्मनेपदित्वात् ॥सिंजनंसिजः ॥घनचैकविनं ॥॥

सर्वप्रातिपदिभ्यः इत्येके ॥ इत्याचारे क्विप्यातरंतावशाद्दुधात्यघः ॥ ८० ॥ स्वभवनकथनविह्नसुपहरं नाह ॥ एभिरिति ॥ हे
साधो जलदहृदयनिहितैस्थापितैरेभिः पूर्वश्लोकेलक्षणैर्द्वारस्योपांते निकटे लिखितवपुषौ चित्रसमर्पितदेहौ शंखप
द्मौ शंखपद्माख्यौ ॥ वनिधी दृष्ट्वा लक्षयेपश्येः सांप्रतं स्वक्रयं भुवनं स्मृत्यसविषादमाह ॥ अधुना मद्वियोगेन तद्भ
२७ वनं क्षामच्छायं गतकांति नूनमुत्खेदयाया ॥ अहमेव मुख्ये स्थइति भावः ॥ स्वां अभिख्यां न पुष्यति खलु प्रसिद्धो किमिव
सूर्यापाये ऽपगमे सति कमलमिवा निधिर्नामशोविधिर्भेदाः पद्मशंखाद्वयो निधेरित्यमरः ॥ गृहदर्शनानंतरे किं कार्यं
मित्याह ॥ ८१ ॥ गत्वेति ॥ भो जलद शीघ्रं यथा तथा संपातं संचरणं तद्धेतोः तदर्थं कलभवत् ॥ तनुतां कृशतां सद्यो
गत्वा प्राप्य प्रथमकथिते पूर्वोक्ते रत्नसानौ क्रीडाशैले निषण्ण उपविष्टः सन् विद्युत्त्वन्मेषउन्मीलनं स एव दृष्टिः ॥ प्र
कृशाकत्वात् ॥ अंतर्भवनपतितां भवनमध्यपतितां कर्तुमर्हसि कीदृशीं अतिशायेन अल्पाभायस्याः तां अत एव खद्यो राम
तानां ज्योतिर्गणानां अल्पाः पंक्तीर्विलसितं स्फुरणमेव वनिभातितां ॥ अर्हसीति अर्हपूजायां ध्यत्नामनेकार्थत्वात् २७

तत्रस्थितोमद्वार्यांइत्यसीत्यर्थः ॥ कल्पमस्त्विंशदक्षरकइत्यभिधानचिंतामणिः ॥ ८४ ॥ श्लोकद्वयेनस्वकीयप्रेय
स्यलक्षणांदर्शयति ॥ तन्वीति ॥ तत्रालये ॥ तन्वीकृशतनुः ॥ श्यामायौवनमध्यस्थाहरितवर्णावाषोडशवार्षिका
॥ ॥ श्यामायौवनमध्यस्थेतिवाक्यात् ॥ शिखराणिदाडिमबीजानिवदशनायस्याः सशिखरिणः कोटिमंतोद
शनांदंतायस्याइतिवा ॥ शिखरंवज्रंतद्वदुज्वलदशनेतिवापक्वदाडिमबीजाभमाणिक्यंशिखरंविदुरित्यभि
धानचिंतामणिः ॥ पक्वपक्वबिंबधरोष्ठोयस्याः ॥ मध्येमध्येदेशेक्षामाकृशोदरीचकिताबस्तस्तायाहरिणीतद्वत्प्रेक्ष
णइति ॥ प्रक्षणी ॥ निम्नानाभिर्यस्याः सा ॥ श्रोणीभारादलसगमनेयस्याः स्तनाभ्यांस्तोकंकल्पनम्रागुवातिवि
षयेध्यातुर्वृह्मणाआद्यासृष्टिःप्रथमसर्गइवास्थिता ॥ माध्येक्षामेति ॥ अन्येईमस्तकादिल्पत्वकूपेक्षणाति ॥
॥ कर्तर्युपमानइतिणिनिः ॥ एवंविधायास्त्रीस्यात् ॥ पदितिष्ठति ॥ तोजानीयाइत्यत्रयत्रसंबंधः ॥ स्यादि
त्याख्यातप्रतिरूपकमव्ययांयद्यर्थेव्ययं ॥ ८५ ॥ तामिति ॥ भोजदलतांमस्त्रियांमेद्वितियंजीवितंजा

तत्रस्थितो मद्रार्थी इत्यसीत्यर्थः ॥ कलमस्त्रिंशदक्षरक इत्यभिध्यनचिंतामणिः ॥ ८२ ॥ श्लोकद्वयेन स्वकीयश्रेय
स्पलक्षणां दर्शयति ॥ तन्वीति ॥ तत्रालये ॥ तन्वी कृशतनुः ॥ श्यामा यौवनमध्यस्था हरितवर्णा वा षोडशवार्षिका
॥ ॥ श्यामा यौवनमध्यस्थेति वाक्यात् ॥ शिखराणि दाडिमबीजानि व दशना यस्याः सशिखरिणः कोटिमंतो द
शना दंता यस्या इति वा ॥ शिखरं वज्रं तद्वदुज्वलदशनेति वा पक्कदाडिमबीजाभमाणिक्यं शिखरं विदुरित्यभि
ध्यचिंतामणि ॥ पक्वपक्वबिंबधरोष्ठो यस्याः ॥ मध्येमध्ये देशे क्षामा कृशोदरी चकितत्रस्तस्ता या हरिणी तद्वत्प्रेक्ष
णइति ॥ प्रेक्षणी ॥ निम्ना नाभिर्यस्याः सा ॥ श्रोणीभारादलसगमने यस्याः सा नाभ्यां स्तोकं कल्पन प्राप्नुवतीति वि
षयेष्वानुर्व्रलगात्राणां आद्यासृष्टिः प्रथमसर्ग इवास्थिता ॥ माध्येक्षामेति ॥ अमर्द्दे मस्तकादित्यलकृद्धेक्षणेति ॥
॥ कर्त्तर्युपमानइतिणिनिः ॥ एवंविधा या स्त्री स्यात् ॥ पदिति श्रुति ॥ तो जानीयादित्यत्र रयत्र संबंधः ॥ स्यादि
ति आख्यातप्रतिरूपकमव्ययं यद्यर्थेव्ययं ॥ ८३ ॥ ता मि ति ॥ ॥ भोजदल तां मस्त्रियां मोहितियं जीवितं जा

नीया॥ कीदृशी परिमिता स्वल्पा कथ्य भाषणं यस्याः सा॥ तथा दूरीभूते दूरस्थे मयि सहचरे चक्रवाके दूरस्थे वत्र
वाकीमि॥ बेत्तो॥ पूर्वोक्तानां लक्षणा॥ नामन्यथाभावमाकाशं कौ व्याचष्टे॥ गाढोत्कंठां गुरुषु दुःसहेषु एषु दिवसेषु गछ
न्सु बालां तु हितैं मे नमथितां पद्मिनीमिवान्यथारूपां जाता मन्ये गाढोत्कंठामिति॥ वापाठः॥ वाशब्द इवार्थे॥ ८४॥ स
२८ मस्तानामंगानां मूरव्यभूतस्याननस्यान्यरूपमाह॥ नूनमिति॥ भो मेघ नूनमिति वितर्के तस्यामहद्दुःखभायाः सु
स्वं कर्तुं॥ तवानुधारणामनुगमनं तेन क्लिष्टा कांति दीप्तिर्यस्य तत्स्येंदोर्हैन्यं दीनभावेति नन्विधारयति कीदृशं॥ प्रव
लमविछिन्ने॥ यदुदिते रोदनं तेनोछूनेशोफसहि॥ तेने त्रे यस्य तत्॥ तथा निःश्वासानामशिशिरतयोः स्नतयाभिन्न
वर्णागतलावण्योऽधरऽष्ठो यस्य तत्॥ हस्ते वामकरे न्यस्तं स्थापितं॥ दुःखितस्य खीजन्यस्य भग्नावः॥ संस्कारा मा
वात्॥ लंबा स्त्रलकाललाटावलंबिनः कुटिला केशा यस्य तस्य भावस्तत्वं तस्मात् र दस कलाऽसंपूर्णाव्यक्तिराका राम
रोपस्य तत्॥ ८५॥ लल लक्षणांतरैस्ताज्ञापयति॥ आलोकइति॥ भो उज्जद॥॥ साक्षी ते आलोके दर्शने सति पुरा २८

निपतति त्वादिलोकस्साधु पतिष्यतीत्यर्थः ॥ यावत्पुरानिपातयोर्लडिति भविष्यदर्थे लट् ॥ कीदृशी मदागमनाय दे
वताभ्योपहृतबलिदानं नैवेद्यं वितरणाते न व्याकुला वा ॥ तथा मत्सादृश्यं मद्विषयमालेख्यं लिखंती वा ॥ कीदृशं ॥ विरहे
णावियोगेन यो सौ तनुतायाद्युर्बलस्य भावः चिंतितेन गाम्यं विरहादिदृश्यं सीघ्रमन्यथात्वमिति ॥ उत्प्रेक्षया गम्य
मितिभावः हे रसिके हेतु कृपारसोपस्कृतमानसे त्वं कच्चिद्भर्तुः स्मरसि ॥ त्वं तस्य मल्लभस्य प्रियेति ॥ मधुरवचनां
मनोरमवाक्यां पंजरस्थां सारिकां पृच्छती वा भर्तुरिति ॥ अधिगर्थेति कर्मणि षष्ठी ॥ स्नोकोदर्शनो घोतगावित्यमरः ॥ क
च्चिद् इति प्रियप्रश्ने इत्यभिधानचिंतामणिः ॥ आलेख्येपि च सादृश्यमिति यादवः ॥ पंजरः पक्षिरक्षाकरः इत्यर्थः
॥८६॥ उत्संगं वा इति ॥ सोम इव सुंदरः सौम्यः तत्संबुद्धिः ॥ हे सौम्य मे घमलिने वस्त्रं यस्य स तस्मिन् ॥ एतेन पाति
व्रत्यं ज्ञापितं ॥ उत्संगं वीणां निक्षिप्य नयनसलिलैर्नेत्रांबुभिः ॥ आर्द्रां तंत्रीं सारयित्वा पाणिनाशोध्य शम मगोत्रं ना
मंत्रांकश्चिह्नं यस्य तत् ॥ गेयं गीतं मुद्रातुकामो यस्याः सा सती भूयो भूयः कथंचित्स्वयमपि कृतां आत्मप्रस्तु

मूर्छनानां ॥ सप्तस्वरक्रमस्थापनां विस्मरंतवाते आलोकेषु रानिपपतति ॥ कीदृशं विरचितानि ॥ आरोहावरोहिस्वरक्र
मेणाविनिवेशितानि स्थापितानि पदानि यत्र तत् ॥ क्रमयुक्ताः स्वराः सप्त मूर्छनापरिकीर्त्तिता ॥ ८१ ॥ शेषानिति ॥
२८ भुविदेहल्यां पूजार्थं मुक्तैर्विन्यासीतैः पुष्पैः प्रियस्यागमनदिवसे स्थापितस्यावधेः कालनियमस्य शेषान् मासान्
गणनया एव द्वित्रिचतुःपंचक्रमसंख्यया विन्यंती स्थापयंती ते तव आलोके पतति पुरा ॥ द्धहृदयेनिहितत्रारंभी
यस्यतं मया सहसंभोगं आसादयंती अनुभवंती ते आलोके सति पुरा निपतति ॥ प्रायेण एते ऊक्तप्रकाराः
रमणविरहेषु अंगनानां विनोदाः कालयापकाः गृहावग्रहणी देहल्यंगणो वलराजिर इत्यमरः ॥ ८२ ॥ तस्याविलो
कनानंतरं निशि भाषणं कर्त्तव्यमित्याह ॥ सव्यापारामिति ॥ मद्वियोगो हनि सव्यापारां ते सखीं म इ ज्ञानं पीडयेत् ॥
॥ ॥ यथा रात्रौ गुरुतरस्तु वंगरिष्ठ शोकां निर्विनोदां पीडयति ॥ इत्यहं संशंके ॥ अतः भो मेघ निशीथे ऽर्द्धरात्रे सन् राम
वातायनस्थः सन् उन्निद्रां अवनि शयनां तां सध्वीं मत्संदेशैः अलं सुखयितुं पश्य अर्द्धरात्रनिशीथो द्वावि २८

त्यमरः॥ साध्वीमितिरात्रावपिसंभाषणेहेतुः॥ ८८॥॥ कैश्चितस्लोकैः॥॥ तामेववर्णयति॥ आद्यति॥ ॥अयमिताअसं
संस्कृतानखायस्यतेनकरेणतामेकवेणींगंडस्यकपोलस्यआभोगात्फल कादसद्धारंसारयंतीअसारयंतीतां
अलंसुखयितुंपश्येतिसंबंधः॥ तामितिकां॥ आद्येप्रथमेविरहदिवसेशिरोदाममालांहित्वायाबद्धा॥ तयाशाप
शपांतेविगलितागताशुक्शोकोयस्यसतेनमयाउद्वेष्टनीयामोचनीयास्पर्शस्पस्पलगिंद्रियस्यक्लिष्टंवापि
कांकस्विनानासौविषमानोद्वावावतां॥ ९०॥ निश्वासेनेति॥ अलकंनूनंनिश्वासेनविक्षिपंतीतांसुखयितुंप
श्येतिसंबंधः॥ कीदृशेनअधरकिसलयंक्लिश्नातिउष्णत्वात्॥ कीदृशमलकं॥ शुद्धस्नानात्परुषंकर्कशं॥ नु
थाआगंडंकपोलस्यत्नपर्यंतंलंबतेतं॥ स्वप्नजोपिमत्संयोगः कथमपिभवेदितिहेतोर्निद्रामाकांक्षंतीकीदृशी
निद्रां॥ नयनसलिलस्योत्पीडःपीडस्तेनरुद्धोवकाशोयस्यास्तां॥ ९१॥ आधिक्षामामिति॥ आधिर्मानसीव्य
थातेनक्षामांक्षीणांविरहशयनेसन्निषण्णांएकंवामदक्षिणयोरन्यतरत्पार्श्वंयस्याः सातांपूर्वस्यादिशोमूले

मुखेंदिमांशोः कलैवकलामात्रंशेषोयस्यास्तांतनुंमूर्त्तिमिवस्थितां ॥ याराविर्मयासाईइच्छयाकृतैरतैः स्नामि
वनीतातांरात्रिमेवउष्णैर्विरहजनितैः अश्रुभिर्वाष्पैर्यापयंतीवाहयंती ॥ ८२ ॥ पादानिति ॥ विर्मयासाईइछ
याकृतैरतैः स्नामि [illegible]
३० जालानांगवाक्षाणांमार्गेणप्रविष्टान्‌अमृतेनशिशिरान्‌इंदोःपादान्‌किरणान्‌पूर्वप्रीत्याअभिमुखगतंखे
दात्तथैवकिरणेभ्यःसन्निवृत्तंनेत्रंचक्षुःसलिलगुरुभिःपक्ष्मभिःछादयंती ॥ साभ्रेनीरदाभियुक्ते ऽह्निदिव
सेस्थलकमलिनीमिलनप्रबुद्धांनसुप्तांतांसुखयितुंपश्यतीतिसंबंधः ॥ ८३ ॥ एतादृशीसाकथंज्ञायतइत्याह
जानइति ॥ भोमेघ ॥ तवसख्यामस्त्रियायांमनोमयिविषयेसंभृतस्नेहमहंजाने ॥ अस्मात्कारणात्प्रथमविरहेइ
त्थंभूतातांतांतर्कयामि ॥ उक्तेष्वेष्वनुभगमात्मानंमन्यतेष्वभगांन्यस्तस्यमांवाचालंयत्किंचिद्वादिनंनखलु राम
करोति ॥ कुत एतदित्याह ॥ यत्‌यस्मात्‌हेभ्रातःनिखिलंमयोक्तंतत्त्वेविरात्स्वत्प्रत्यक्षंभविष्यति ॥ एवंभूतांमवेक्ष्य ३०

मद्भवः सत्यमिति ज्ञास्यतीतितात्पर्यार्थः ॥८४॥ तस्या दैन्यं रूपयति ॥ सेति ॥ साऽबलास्त्री एतादृशं गात्रं धा
रयंती सलिलमपि नवजलमयं श्मश्रुवाष्पं मोचयिष्यति ॥ तथा दुःखितां तां विलोक्य त्वामपि रोदिष्यतीत्य
र्थः ॥ न केवलं मां अपितु त्वामपीत्यपेरर्थः ॥ तस्याः दुःखे मम रोदनं किं कारणमित्याह ॥ आर्द्रांतरात्मा सरसमनो
वृत्तिः ॥ सर्वः प्रायो बाहुल्येनावश्यं करुणामयि वृत्तिर्यस्य स तादृशो ॥ भवति ॥ कीदृशं वपुः विरहान्नसंन्यस्ताभि
षक्तान्याभरणानि यस्य तत् ॥ तथा पेलवं मृदु ॥ अतएव शय्या उत्संगे पृष्ठे दुःखेनातिक्लेशेन असकृद्वारं
वारं निहितं दुःखेनेति ॥ अतिशयेद्धिवचनं ॥ गात्रं वपुः संहननमित्यमरः ॥८५॥ त्वयि तत्र गते सति तस्याः शुभ
निमित्तं व्याचष्टे स्पंदेति ॥ भोमेघ ॥ त्वयि आसन्ने निकटवर्तिनि सति ॥ मृगाक्षा मत्प्रियानयनं वाम ने
त्रं विवक्षितैकवचनात् मानानां त्वौभात्परिवर्तनात् ॥ चलयत् कुवलयं तीव्लोत्पलं तस्य श्रियस्तुल
मेष्यतीति ॥ शंके ॥ संभावयामि ॥ कीदृशं अलकैः रुद्धेऽपांगेन प्रसरो यस्यास्तत् ॥ अंजनेन स्नेहः स्निग्धा

त्वं तेन स्मृत्यं मध्यरोमघस्य प्रत्यारेशीन्निराकरणाद्धि स्मरता भ्रुविलासयेन तत्॥ स्त्रीणां स्वभावत एवक्लिना
३० सयोगेपि॥ मधुपानस्याभावान्नाभिव्यक्तिरिति॥ भावः॥ उरस्यं दृश्वलनं घस्यतत्॥ अपांगयेः॥ नेत्रयोः रंतः प्रत्याये
दृशोनिराकृतिरित्यमरः॥ ८६॥ वा म इ ति॥ अस्याः प्रियायाः वामऊरुः श्चंवलत्वं चंचलतां तयास्यति॥ ममसंदे
शः हारिणी॥ मीपपवर्त्तिनि सति तस्याः शुभस्सूचकं॥ वामनेत्रस्फुरणं न भविष्यतीति॥ तात्पर्यार्थः॥ कीदृशः मदी
ये ऽकरुरुहैर्नखक्षतैर्मुच्यमानः स्त्यज्यमानः चिरं बहुकालपरिचितमभ्यस्तं मुक्तामयं करितद्भूषणं दैवगत्या
विधिवशेन त्याजितः॥ तथा संभोगस्य सुरतस्यांते ऽवसाने मम हस्तसंवाहनानां करमर्दनानां समुचितः॥ क
नकस्य कदलीस्तंभस्तद्वदूरुः॥ पुनर्भवः कररुहो नखो ऽस्त्री नखो ऽस्त्रियामित्यमरः॥ योषितऊरुमूले दंतनखक्ष
ख॰२ तनिर्वापणाय मुक्ताजालं दधाति॥ पतयातुनेंद्रात्त संयोगाभावतो मुक्ताजालेन धृतमिति ज्ञेयं॥ ८७॥ निजवद्वनभा राम
त्यस्य प्रेमप्रकटयन्नाह॥ त स्मि न्नि ति॥ हे जलद॥ तस्मिन्काले निशीथे सा स्त्री यदि ल॥ घ्वंनिद्रासुखं यया सा ता ३१

दृशी स्यात्तर्हि तत्र गवाक्षमार्गे स्तनितविमुखो गर्जितरहितस्त्वमासीनः स याममात्रं सहस्व प्रतीक्षेथः किमर्थमित्याह
॥ अस्याः प्रियायाः प्रणयिनि भर्तरि मयि कथंचित्स्वप्नलब्धे सति गाढं दृढं च तदुपगूढमालिंगनं वसयकंठाच्च
च्युतो बाहुलताग्रथिः पशो यस्य तन्मा भूत् ॥ स्तनितानि मील्य नेत्रे सहसा प्रबुध्यते तितिववरात् स्वरज्ञाडे स्त्रायो याम
मात्रमिति नोक्तं विप्रलंभोपेक्षया संभोगस्य च परमवधिर्यामः ॥ उक्तं च ॥ रमातुरति यूनां दृष्टा यो मा वसानि
कीति ॥ ९८ ॥ अथ कृत्यं दर्शयन्नाह ॥ तामिति ॥ हे जलद ॥ स्वजलस्य कणिकाभिः ॥ बिंदुभिः ॥ शीतलेनानि
लेन वायुना मालतीनां जातीनामभिनवैर्जालकैः कलिकाभिः समं प्रात्यास्वस्तां प्रबुद्धां गतग्लानिं वा तां प्रिया
मुत्थाप्य त्वं धीरैः स्तनितानि गर्जितान्येव वचनानि तैः मानिनीं मनस्विनीं वक्तुं प्रक्रमेथाः ॥ प्रारभेथाः ॥ की
दृशस्त्वं ॥ विद्युद्गर्भे यस्य तादृशः सन् ॥ कीदृशीं त्वत्सनाथे त्वद्युक्ते गवाक्षे स्तिमिते निश्चले नयने यस्याः भर्तुः
॥ सकाशात्कोप्यागच्छेदिति स्फुरत्कंठया वातायनरत्नं वक्तुं प्रवर्षन्तीं मालत्यः पुष्यंति निशि विकसंतीनि ज्ञ

सिद्धिः तदुपादानंततोपितस्याःसौकुमार्यंववनाथेः ॥९९॥ संदेशप्रकाशंदिशति ॥ भरिति ॥ हे अविधवस्त्वा
मिनि अमुनातवमेघेनाजीवतीत्युक्तं ॥ भर्तुःप्रियंमित्रंमनसिनिहितैस्तत्संदेशैः ॥ त्वत्समीपमागतंमामंबुवा
३२ हंत्वमितिजानीहिनकेवलंतस्यमात्रंमित्रमात्रं ॥ किंतुत्वत्प्राप्तयेतस्यप्रोन्मादकृष्यभवामीत्याह ॥ यःप्रोषि
ताः ॥ प्रवासात्भार्याविहस्यगतानांदेशांतरंपथिकानांवृंदानिसमूहात् ॥ मंद्रस्निग्धैर्धीरमधुरैर्ध्वनिभिर्गर्जि
तैरबलानांभार्याभिर्विरहितांगनानांवेणायःकेशसंयमनविशेषास्तान्संमोक्षोमोक्षनंतत्रोन्सुकानि उत्कंठिता
नित्वरयति ॥ ॥१००॥ इतीति ॥ हेसौम्यमेघ ॥ त्वयाइत्याख्यातेकथितेसतिसाप्रेयसीउन्मुखीसतिउत्कंठयोच्छ्वसि
तहृदयंचेतोयस्याःसातादृशी ॥ मैथिलीसीतापवनतनयंहनुमंतमिवत्वांवीक्ष्य संभावनायांचविध्यर्थेत्यर्थः
॥ अस्मत्हृदयस्त्रिमित्रमित्रस्मात्वदनात्परमविहितासावधाना भवतीसंदेशंश्रोष्यति ॥ सावधानत्वेकोहेतुरित्याह राम
॥ सीमंतीनांस्त्रीणांसुहृदामित्रेणोपहृतसमानीतः ॥ कांतस्यवल्लभस्योदंतोवार्त्ता ॥ संगमात्संयोगात्किंचिन्मात्रदा ३२

कनोहि न तस्मादृशो भवतीत्यर्थः ॥ १०१ ॥ कुशलपृच्छाकपटेन स्वजीवितं ज्ञापयति ॥ तामिति ॥ हे आयुष्मन् मे
घ मम च वचनाद्वाक्याच्च आत्मन उपकर्त्तुं च नाम तत् ॥ ब्रूयं एवं वक्ष्यमाणं कथयाः ॥ कथये ॥ एवमिति किं ॥ हे अबले दो
षित भार्त्ते केरामगिर्याश्रमस्थोऽव्यापन्नः कुशलवात्तर्वियुक्तो ॥ दूरवर्त्ती सन् सहचरः पतिस्त्वां कुशलं पृच्छति ॥
पृच्छिर्द्विकर्मकः ॥ एतदेव किमिति ॥ ति प्रष्टव्यमतस्त्वाह ॥ सुलभाविपदो येषां तेषां प्राणिनामेतदेव कुशलमेव
पूर्वाभाष्यं प्रथमप्रार्थनीयं ॥ आयुष्मन्नित्यनेन त्वयि जीवति सा वाहं च जीवाव इत्यसूचि ॥ कुशलं क्षेममस्त्रिया
मित्यमरः ॥ संदेशान्तरं ब्रूते ॥ अंगेनेति ॥ हे सुंदरि वैरिणा विधिना विध्यन्नीरुद्धमार्गो दूरत्वस्तोऽपि यस्तैस्तैः संक
ल्पैर्मनोव्यापारैस्त्वां करोति ॥ केनकेन संकल्पेन प्रकारेण विशंती त्सुत्वेन्द्रायामावषे ॥ न त्वना कृशेनांगेन
देहेन प्रतनु अंगं विशति ॥ कृशत्वे निमित्तमाह ॥ कौ दृशेन ॥ गाढं तप्तेन ॥ कौ दृशं तप्ततत्राभिव्यंजकमाह ॥ साश्रेणा वा
प्युक्तेः ॥ तथ्यमश्रुद्रुतं दुतास्रं ॥ आहिताग्न्यादिपाठात् ॥ अश्रुपतिहेतुमाह ॥ उत्कंठितेन तथाविरतविच्छिन्नोत्कंठापस्य

३३

तत्॥ अत्रात्मधर्मा अप्युत्कंठादयः शरीरे पि प्रयुज्यंते उच्चारात्॥ उत्कंठायामभिव्यंजकमाह समाधिकस्त्रीहाउच्छ्वा
सो यस्य तेन॥ तयोः स्त्रोच्छ्वासं॥ विशतीतिसर्वत्र योज्यं॥ तिग्मंती अं खं रंती हां चंउ मुखं पदु स्मृतमिति यादवः॥ १०३॥
निजप्रीतिकथनेन वल्लभायाः॥ प्रीतिमुत्पादयति॥ शब्देति॥॥ स्य पदं स्त्रवणाविषय मन्यो न्यवार्त्ताश्रवणादेशमति॥
क्रांतो लोचनाभ्यामदृश्यो भवत्॥ मन्मुखेनोत्कंठामधिकृत्य विरचितपदं यद्या स्यात्तया ह्वामिदवद्ध्यमामार्मेह संक्र:
॥ यौंपह्नः शब्दो एवाख्यो भिधेयो यस्य यद्वचनं॥ स्थानेन शब्दो नोच्चैः॥ शब्देनाख्यायं वार्त्तं दपिकिल्लेति संभावनायां
सखीनां पुरस्तादाननस्पर्शलोभात्॥ त्वन्मुखस्पर्शसुखालिल्लाषाते नृवकौंकथयत्तं लोलोलंपयेन्द्र॥
न्॥ १०४॥ स्वकीयप्रेमप्रकाशयति॥ शमास्विति॥ हे वंडिकोपनशीलेते साहृश्यं॥ एकस्त्रु क्वापि दपि कुशापि
नास्ति॥ हं तेति खेदे एकत्राभाव॥ मवदृशी यतिस्यामासु प्रियंगलतासु त्वंगमुत्याश्यामि॥ श्यामलतनुना भ्याम राम
गसदृश्यं॥ चकितारु स्त्रस्ताश्वताहरिणपस्तू॥ संप्रेक्षिते विलोकने दृष्टिपातानुनाभ्यामंग सदृश्यं॥ चकिता ३३

स्त्री।स्त्राश्चताहरिणपसन्॥ संप्रेक्षिते विलोकने दृष्टिपातानुत्प्रेक्ष्यामि॥ चलत्वेन साम्यं॥ शशिनि वक्त्रस्य मुखस्य
मुखस्य छायां दीप्तिं॥ कांतिमत्वानंददायित्वाभ्यां चंद्रसादृश्यं॥ शिखिनां मयूराणां बर्हिभारेषु केशान्॥ नीलत्वकु
टिलत्वादिना तत्तुल्यता॥ प्रतनुषु नदीवीचिषु कल्लोलेषु भ्रूविलासान्॥ कुटिलत्वदीर्घत्वाभ्यां सारूप्यं॥ उत्प्रेक्ष्यामीति सर्व
त्र प्रयोज्यं॥ प्रियंगुः फलिनी श्यामोत्यभिधानचिंतामणिः ॥१०५॥ त्वामिति॥ हे सुंदरि शिलायां धातुरागैः गैरिकादिवर्णैः ५४
प्रणयकुपितां स्नेहक्रुद्धां त्वामालिख्य चरणपतितमात्मानं कर्तुं यावदिच्छामि तावन्मुहुरुपचितैः प्रवृद्धैरस्रैरश्रु
भिर्मे दृष्टिरालुप्यते आच्छाद्यते॥ क्रूरः कृतांतो विधिस्तस्मिन्काले रूपेपि नौ आवयोः संगमं संयोगं न सहते न क्षमते
॥ अत्र तु ख्यारूढमेव चित्रलेखनादिकं विवक्षितं न तु वास्तवं अनुरागाभावप्रसंगात्॥ कृतांतो यमसिद्धांतदैव
कुशलकर्मसु॥ ॥१०६॥ स्वप्नसंयोगमाहामामिति॥ हे त्वद्विधिवे स्वप्नसंदर्शनेषु कथमपि लब्धायास्ते निर्दयं य
था स्यात्तथा आश्लेषहेतोरालिंगनार्थं आकाशे प्रणिहितौ प्रेरितौ भुजौ येन असत तं मां पश्यंतीनां स्थलदेवतानां वन

धिष्ठात्रीणां मुक्तावत् स्थूला अश्रूणां लेशाः कणास्तरुकिसलयग्रहणां पतिता अश्रुलेशत्वमकाशय ॥ १०७ ॥ भित्त्वेति
हे प्रिये गुणवति गुणकणकलिते ॥ तवांगं एभिः पूर्वं यदि स्पृष्टं किल भवेत् इति मया ते तुषाराद्रिवाताः आलिंग्यंते ते
क्येवाताः देवदारुद्रुमाणां वृक्षविशेषाणां किसलयपुटं पत्रपुटं भित्त्वा विकाशयित्वा तेषां देवदारुद्रुमाणां क्षीरस्रुति
सुरभयः संतः दक्षिणेन मार्गेण प्रवृत्ता आगताः प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया गुणवती त्वं अत्र गुणशब्दे
३४ न शरीरस्य हृदयस्पर्शगुणो विवक्षितः ॥ किलेति संभा॥वनायां ॥ १०८ ॥ संक्षिप्यंत इति ॥ नो त्र्वलोद्दीर्घा क
यामाः प्रहरा यस्याः सा तारा त्रयः क्षणा इव कथं संक्षिप्यंते ॥ सर्वावस्थासु ग्रीष्ममध्यं दिनासु अह्नरपि कथं मंदातपं स्यात्
हे चटुलनयने वामनेवेद त्वं दुर्लभप्रार्थनं मे चेतो गाढोष्माभिस्तद्वियोगव्यथा स्मरशरणामरक्तकं कृतं ॥ गाढो
ष्माभिरित्यनेन मंदातपविघातो विवक्षितः ॥ वियोगपथ्यभिरित्यनेन रात्रिसंक्षेपविघात इति द्रष्टव्यमंदमितिप्र राम
कारगुणावचनमस्येति द्विर्वचने ॥ १०९ ॥ सांप्रतं सौकश्रवणेन सदुःखस्यादिति प्रियामाश्वासयति ॥ नन्विति ब ३४

दृमंगलं ॥ भविष्यतीति विगणयन् आत्मना स्वयमेव आत्मानं अवलंबे धारयामि ॥ ननु शब्दोऽवधारणे ॥ हे कल्या
णि त्वमपि सुतरां कातरत्वं मा गमः ॥ उक्तमेवार्थं संहरंति ॥ कस्यात्यंतमिति अत्यंतावसानं नित्यमित्यर्थः ॥ सुखमुपनतं
दुःखं वा एकांततः ॥ एकांतत उपरानंतं प्रतमार्थे तसिल् ॥ दशावस्था चक्रनेमिक्रमेण नीचैर्गच्छति उपरि वा ॥ ११० ॥
॥ कदावयोः संयोगः स्यादित्यत आह ॥ शापांत इति शार्ङ्गपाणौ नारायणे भुजगशयनादुत्थिते ॥ सति मे मम शा
पस्यांतोऽवसानं तत्रैतात् चतुरो मासान् लोचने मीलयित्वा गमयातिवाहय पश्चात् शरच्चंद्रिकासु ज्योत्स्नासु नि
शासु विरहकालगुणितं संकल्पितं हृदयस्थापितमित्यर्थः ॥ तं तं आत्माभिलाषं आवां निर्वेक्ष्यावो अनुभविष्यावः
॥ शांति ॥ नन्वाषाढश्रावणयोः प्रावृट् ॥ ततः परं शरदिति तत्कथमाषाढात्प्रभृति मासचतुष्टयात्परः ॥ शरदिति
॥ नैवं वाच्यं षड्ऋतव इत्येकः पक्षः ॥ त्रय इत्यमरः ॥ चत्वारो वार्षिका मासा इति रामायणे ॥ प्रयोगादन्यस्तु त्रयापे
क्षयोत्तात् ॥ १११ ॥ भूयस्चेति ॥ भूयश्चाह ॥ पुनरपि मन्तु खेद्याः वक्षे पुरा पूर्वं महं त्वमपि शयने सुप्तोतत्र मेके

121/6

ठलग्ना सती त्वं निद्रां गत्वा किमपि निमित्तं प्राप्य सस्वरं शब्दं रुदती विप्रबुद्धा ततो सत्वरं पृच्छतो मे मह्यं त्वया च सां
तर्हासं गूढं हसित्वा कथितं किमिति॥ रे कितव धूर्त मया स्वप्ने कामपि प्रिये॥ यस्त्रीरमयन्॥ त्वं दृष्टोऽतो हं ईर्ष्यावशाद्रौदि
मीति वचनमभिज्ञानं॥११५॥ एतस्मादिति॥ असिते कृष्णे नयने लोचने यस्याः सं बुद्धिः॥ एतस्मादमुष्मादभिज्ञा
३५ नदानाच्चिह्नकथनान्मां कुशलिनं विदित्वा कौलीनात् स्वपरस्त्रीसंगमः॥ संभाव्यरति॥ लोकापवादान्मयि ऽ वि
श्वासिना मा भूः अविश्वासः संमाकर्षीः कौलीनं निरावष्टे॥ विरहे वियोगे स्नेहात्॥ ध्वंसिनो नष्टानाहुः॥ प्रव
ष्टते तत्किमपि यत्किंचिदपि अविचाररमणीयमिति भावः॥ हि यस्माद्धेतोः स्नेहा अभोगादिष्टे वस्तुनि उपचितरसा
वर्द्धिताः भिलाषाः संतः प्रेमराशीभवंती॥ स्यात्कौलीनं लोकवादे देषु युद्धे पश्वाहिपक्षिणां इत्यमरः नमाऽ योगेश्व
गमः॥११६॥ आश्वास्यैति॥ भो मेघ॥ प्रथमविरहे गाढ उदग्र उत्कटः शोको यस्यास्तां सखीं प्रियामेव मुक्त्वा प्रकारे राम
णाछैलात्कैलाशान्निवृत्तः सन्॥ त्वं तस्याः सद्यः भायावचोभिर्ममापि मानसं धारयऽश्वास्याश्वसं दत्वा विन ३५

॥ इति मेघदूतव्याख्या ॥

121/6

ठल ॥ ग्ना सती त्वं निद्रां गत्वा किमपि निमित्तं प्राप्य सस्वरं शब्दं रुदती विप्रबुद्धा ततो सत्वैः स्वरच्छतो मे मह्यं त्वया वसां
तर्हि संगूढं हसित्वा कथितं किमिति ॥ रे कितव धूर्त मया स्वप्ने कामपि प्रिये ॥ यसी रमयन् ॥ त्वं दृष्टोऽतो हं ईर्ष्यावशाद्रोदि
३५ मीति वचनमभिज्ञानं ॥ ११४ ॥ एतस्मादिति ॥ असिते क्षणे नयने लोचने यस्यास्तत्संबुद्धिः ॥ एतस्माद मुष्मादभिज्ञा
नदानाच्चिह्नकथनान्मां कुशलिनं वदित्वा कौलीनात्त्वस्य पर स्त्री संगमः ॥ संभाव्य रति ॥ लोकापवादान्मयि ऽ वि
श्वासिनामा भूः अविश्वासं मा कर्षीः कौलीनेन निरावष्टे ॥ विरहे वियोगे स्नेहान् ॥ ध्वंसिनो नष्टा नाह्नः ॥ प्र च
स्तेत त्वं किमपि यत्किंचिदपि अविचाररमणीयमिति भावः ॥ हि यस्माद्धेतोः स्नेहा अभोगाद्विषेव स्तून्निरूर्या वेतरसा
वर्द्धिताः भिल्लाषाः संतः प्रेमराशी भवंती ॥ स्यात्कौलीनं लोकवादे देषु युद्धे पश्चाहि पक्षिणां इत्यमरः नमाद्युयोगेप्र
गमः ॥ ११३ ॥ आश्वास्यैति ॥ भो मेघ ॥ प्रथमविरहे गाढ उदग्र उत्कटः शोको यस्यास्तां सखीं प्रियामेव मुक्त प्रकारे राम
ग्गा छै ला तै ला शान्निवृत्तः सन् ॥ त्वं तस्यास्सहद्भ्र भाया वचोभिर्ममापि मान संधारये ऽश्वास्याश्व संदत्वात्रिन ३५

॥ इति मेघदूतव्याख्या ॥

दुमंगलं ॥ भविष्यतीतिविगं णायनन् आत्मनास्वयमेव आत्मानवलंवे धारयामि ॥ ननुशब्दोवध्यसरणो ॥ हेकल्या
णित्वमपिसुरताकातरत्वमागमा ॥ उक्तमेवार्थंसंहरंति ॥ कस्यात्यंतमतिश्रांतावसानंनित्यमित्यर्थः ॥ सुखमुपनतं
दुःखंवाएकांततः ॥ एकांतउपरानंतंप्रतमार्थितसिन्न ॥ दशावस्थानकानेमिक्रमेणनीवैर्वागच्छतिउपरिवा ॥ ११० ॥
॥ ॥ कदावयोःसंयोगःस्यादित्यतआह ॥ शापांतइतिशार्ङ्गपाणौनारायणेभुजगशयनादुत्थिते ॥ सतिमेममशा
पस्यांतोऽवसानंतस्मात् वक्ष्रोमसानुलोवनेमिलयित्वागमयातिवाहयपश्चात्शरद्ब्रिकासुत्वयासुनि
शासुविरहकालगुणितंसकल्पितंहृदयस्थापितमित्यर्थः ॥ तंतंअत्माभिलाषंआवांनिर्वेक्ष्यावोऽनुभविष्यावः
॥ शांति ॥ नत्वाषाढश्रावणयोःप्राहट्ट ॥ ततःपरंशरदितितल्लथमाषाढात्अन्तीमासचतुष्टयात्यमरः ॥ शरदिति
॥ ॥ नवैवंवाच्यंषड्तवइत्येकःपक्षः ॥ त्रयइत्यमरः ॥ नत्वारोवर्षिकामासाइतिरामायणे ॥ प्रयोगादत्रक्रतुत्रयापे
क्षयोत्वात् ॥ १११ ॥ भूपस्येति ॥ भूपस्याह ॥ ॥ पुनरपिमन्मुखेव्यावष्टेपुरापूर्वंमहंत्वमपिशयनेसुप्तोतत्रमेके